श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ एकसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकसप्ततितमः सर्गः ॥

## सेनया सह भरतस्य रथेन यात्रामार्गे विविधानि स्थानानि समुल्लङ्घ्य तस्योजिहानायां नगर्यामेकस्मिन्नुद्याने प्रवेशस्तत्र सेनां शनैः शनैरागन्तुमादिश्य स्वयं रथेन तीव्रवेगात् पुरःसृत्य सालवनमतिक्रम्यायोध्यानिकटे गमनं ततश्च अयोध्याया दुरवस्थां दर्शं दर्शमग्रे सरणं सारथिं प्रति स्वीयं दुःखपूर्णमुद्गारं प्रकटय्य राजभवने प्रवेशश्च

स प्राङ्मुखो राजगृहादभिनिर्याय वीर्यवान्।
ततः सुदामां द्युतिमान् सन्तीर्यावेक्ष्य तां नदीम्॥ **2.71.1** ॥

ह्लादिनीं दूरपारां च प्रत्यक्स्रोतस्तरङ्गिणीम्।
शतद्रुमतरच्छ्रीमान् नदीमिक्ष्वाकुनन्दनः॥ **2.71.2** ॥

ऐलधाने नदीं तीर्त्वा प्राप्य चापरपर्वतान्।
शिलामाकुर्वती तीर्त्वा आग्नेयं शल्यकर्षणम्॥ **2.71.3** ॥

सत्यसन्धः शुचिर्भूत्वा प्रेक्षमाणः शिलावहाम्।
अभ्यगात् स महाशैलान् वनं चैत्ररथं प्रति॥ **2.71.4** ॥

सरस्वतीं च गङ्गां च युग्मेन प्रतिपद्य च।
उत्तरान् वीरमत्स्यानां भारुण्डं प्राविशद् वनम्॥ **2.71.5** ॥

वेगिनीं च कुलिङ्गाख्यां ह्लादिनीं पर्वतावृताम्।
यमुनां प्राप्य सन्तीर्णो बलमाश्वासयत् तदा॥ **2.71.6**॥

शीतीकृत्य तु गात्राणि क्लान्तानाश्वास्य वाजिनः।
तत्र स्नात्वा च पीत्वा च प्रायादादाय चोदकम्॥ **2.71.7**॥

राजपुत्रो महारण्यमनभीक्ष्णोपसेवितम्।
भद्रो भद्रेण यानेन मारुतः खमिवात्यगात्॥ **2.71.8**॥

भागीरथीं दुष्प्रतरां सोंऽशुधाने महानदीम्।
उपायाद् राघवस्तूर्णं प्राग्वटे विश्रुते पुरे॥ **2.71.9**॥

स गङ्गां प्राग्वटे तीर्त्वा समायात् कुटिकोष्टिकाम्।
सबलस्तां स तीर्त्वाथ समगाद् धर्मवर्धनम्॥ **2.71.10**॥

तोरणं दक्षिणार्धेन जम्बूप्रस्थं समागमत्।
वरूथं च ययौ रम्यं ग्रामं दशरथात्मजः॥ **2.71.11**॥

तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ।
उद्यानमुज्जिहानायाः प्रियका यत्र पादपाः॥ **2.71.12**॥

स तांस्तु प्रियकान् प्राप्य शीघ्रानास्थाय वाजिनः।
अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ॥ **2.71.13**॥

वासं कृत्वा सर्वतीर्थे तीर्त्वा चोत्तानिकां नदीम्।
अन्या नदीश्च विविधैः पार्वतीयैस्तुरङ्गमैः॥ **2.71.14**॥

हस्तिपृष्ठकमासाद्य कुटिकामप्यवर्तत।
ततार च नरव्याघ्रो लोहित्ये च कपीवतीम्॥ **2.71.15**॥

एकसाले स्थाणुमतीं विनते गोमतीं नदीम्।
कलिङ्गनगरे चापि प्राप्य सालवनं तदा॥ **2.71.16**॥

भरतः क्षिप्रमागच्छत् सुपरिश्रान्तवाहनः।
वनं च समतीत्याशु शर्वर्यामरुणोदये॥ **2.71.17** ॥

अयोध्यां मनुना राज्ञा निर्मितां स ददर्श ह।
तां पुरीं पुरुषव्याघ्रः सप्तरात्रोषितः पथि॥ **2.71.18** ॥

अयोध्यामग्रतो दृष्ट्वा सारथिं चेदमब्रवीत्।
एषा नातिप्रतीता मे पुण्योद्याना यशस्विनी॥ **2.71.19** ॥

अयोध्या दृश्यते दूरात् सारथे पाण्डुमृत्तिका।
यज्विभिर्गुणसम्पन्नैर्ब्राह्मणैर्वेदपारगैः॥ **2.71.20** ॥

भूयिष्ठमृद्धैराकीर्णा राजर्षिवरपालिता।
अयोध्यायां पुरा शब्दः श्रूयते तुमुलो महान्॥ **2.71.21** ॥

समन्तान्नरनारीणां तमद्य न शृणोम्यहम्।
उद्यानानि हि सायाह्ने क्रीडित्वोपरतैर्नरैः॥ **2.71.22** ॥

समन्ताद् विप्रधावद्भिः प्रकाशन्ते ममान्यथा।
तान्यद्यानुरुदन्तीव परित्यक्तानि कामिभिः॥ **2.71.23** ॥

अरण्यभूतेव पुरी सारथे प्रतिभाति माम्।
नह्यत्र यानैर्दृश्यन्ते न गजैर्न च वाजिभिः।
निर्यान्तो वाभियान्तो वा नरमुख्या यथा पुरा॥ **2.71.24** ॥

उद्यानानि पुरा भान्ति मत्तप्रमुदितानि च।
जनानां रतिसंयोगेष्वत्यन्तगुणवन्ति च॥ **2.71.25** ॥

तान्येतान्यद्य पश्यामि निरानन्दानि सर्वशः।
स्रस्तपर्णैरनुपथं विक्रोशद्भिरिव द्रुमैः॥ **2.71.26** ॥

नाद्यापि श्रूयते शब्दो मत्तानां मृगपक्षिणाम्।
सरक्तां मधुरां वाणी कलं व्याहरतां बहु ॥ **2.71.27** ॥

चन्दनागुरुसम्पृक्तो धूपसम्मूर्छितोऽमलः।
प्रवाति पवनः श्रीमान् किं नु नाद्य यथा पुरा ॥ **2.71.28** ॥

भेरीमृदङ्गवीणानां कोणसङ्घट्टितः पुनः।
किमद्य शब्दो विरतः सदादीनगतिः पुरा ॥ **2.71.29** ॥

अनिष्टानि च पापानि पश्यामि विविधानि च।
निमित्तान्यमनोज्ञानि तेन सीदति मे मनः ॥ **2.71.30** ॥

सर्वथा कुशलं सूत दुर्लभं मम बन्धुषु।
तथा ह्यसति सम्मोहे हृदयं सीदतीव मे ॥ **2.71.31** ॥

विषण्णः श्रान्तहृदयस्त्रस्तः संलुलितेन्द्रियः।
भरतः प्रविवेशाशु पुरीमिक्ष्वाकुपालिताम् ॥ **2.71.32** ॥

द्वारेण वैजयन्तेन प्राविशच्छ्रान्तवाहनः।
द्वाःस्थैरुत्थाय विजयमुक्तस्तैः सहितो ययौ ॥ **2.71.33** ॥

स त्वनेकाग्रहृदयो द्वाःस्थं प्रत्यर्च्य तं जनम्।
सूतमश्वपतेः क्लान्तमब्रवीत् तत्र राघवः ॥ **2.71.34** ॥

किमहं त्वरयाऽऽनीतः कारणेन विनानघ।
अशुभाशङ्कि हृदयं शीलं च पततीव मे ॥ **2.71.35** ॥

श्रुता नु यादृशाः पूर्वं नृपतीनां विनाशने।
आकारांस्तानहं सर्वानिह पश्यामि सारथे ॥ **2.71.36** ॥

सम्मार्जनविहीनानि परुषाण्युपलक्षये।
असंयतकवाटानि श्रीविहीनानि सर्वशः ॥ **2.71.37** ॥

बलिकर्मविहीनानि धूपसम्मोदनेन च।
अनाशितकुटुम्बानि प्रभाहीनजनानि च ॥ **2.71.38** ॥

अलक्ष्मीकानि पश्यामि कुटुम्बिभवनान्यहम्।
अपेतमाल्यशोभानि असम्मृष्टाजिराणि च ॥ **2.71.39** ॥

देवागाराणि शून्यानि न भान्तीह यथा पुरा।
देवतार्चाः प्रविद्धाश्च यज्ञगोष्ठास्तथैव च ॥ **2.71.40** ॥

माल्यापणेषु राजन्ते नाद्य पण्यानि वा तथा।
दृश्यन्ते वणिजोऽप्यद्य न यथापूर्वमत्र वै ॥ **2.71.41** ॥

ध्यानसंविग्नहृदया नष्टव्यापारयन्त्रिताः।
देवायतनचैत्येषु दीनाः पक्षिमृगास्तथा ॥ **2.71.42** ॥

मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानपरं कृशम्।
सस्त्रीपुंसं च पश्यामि जनमुत्कण्ठितं पुरे ॥ **2.71.43** ॥

इत्येवमुक्त्वा भरतः सूतं तं दीनमानसः।
तान्यनिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ ॥ **2.71.44** ॥

तां शून्यशृङ्गाटकवेश्मरथ्यां
    रजोरुणद्वारकवाटयन्त्राम्।
दृष्ट्वा पुरीमिन्द्रपुरीप्रकाशां
    दुःखेन सम्पूर्णतरो बभूव ॥ **2.71.45** ॥

बभूव पश्यन् मनसोऽप्रियाणि
    यान्यन्यदा नास्य पुरे बभूवुः।

अवाक्शिरा दीनमना न हृष्टः
पितुर्महात्मा प्रविवेश वेश्म ॥ **2.71.46** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे एकसप्ततितमः सर्गः ॥